१६८

य्

धर्माः पितामहेनोक्ता राजधर्माश्रिताः शुभाः ।
धर्ममाश्रमिणां श्रेष्ठं वक्तुमर्हसि पार्थिव ॥१॥

भीस्म

सर्वत्र विहितो धर्मः स्वर्ग्यः सत्यफलं तपः ।
बहु द्वारस्य धर्मस्य नेहास्ति विफला क्रिया ॥२॥

यस्मिन्यस्मिंस्तु विनये यो यो याति विनिश्चयम् ।
स तमेवाभिजानाति नान्यं भरतसत्तम ॥३॥

यथा यथा च पर्येति लोकतन्त्रमसारवत् ।
तथा तथा विरागोऽत्र जायते नात्र संशयः ॥४॥

एवं व्यवसिते लोके बहुदोषे युधिष्ठिर ।
आत्ममोक्षनिमित्तं वै यतेत मतिमान्नरः ॥५॥

य्

नष्टे धने वा दारे वा पुत्रे पितरि वा मृते ।
यया बुद्ध्या नुदेच्छोकं तन्मे ब्रूहि पितामह ॥६॥

भी

नष्टे धने वा दारे वा पुत्रे पितरि वा मृते ।
अहो दुःखमिति ध्यायञ्शोकस्यापचितिं चरेत् ॥७॥

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यथा सेनजितं विप्रः कश्चिदित्यब्रवीद्वचः ॥८॥

पुत्रशोकाभिसन्तप्तं राजानं शोकविह्वलम् ।
विषन्नवदनं दृष्ट्वा विप्रो वचनमब्रवीत् ॥९॥

किं नु खल्वसि मूढस्त्वं शोच्यः किमनुशोचसि ।
यदा त्वामपि शोचन्तः शोच्या यास्यन्ति तां गतिम् ॥१०॥

त्वं चैवाहं च ये चान्ये त्वां राजन्पर्युपासते ।
सर्वे तत्र गमिष्यामो यत एवागता वयम् ॥११॥

सेनजित्

का बुद्धिः किं तपो विप्र कः समाधिस्तपोधन ।
किं ज्ञानं किं श्रुतं वा ते यत्प्राप्य न विषीदसि ॥१२॥

ब्राह्मन

पश्य भूतानि दुःखेन व्यतिषक्तानि सर्वशः ।
आत्मापि चायं न मम सर्वा वा पृथिवी मम ॥१३॥

यथा मम तथान्येषामिति बुद्ध्या न मे व्यथा ।
एतां बुद्धिमहं प्राप्य न प्रहृष्ये न च व्यथे ॥१४॥

यथा काष्ठं च काष्ठं च समेयातां महोदधौ ।
समेत्य च व्यपेयातां तद्वद्भूतसमागमः ॥१५॥

एवं पुत्राश्च पौत्राश्च ज्ञातयो बान्धवास्तथा ।
तेषु स्नेहो न कर्तव्यो विप्रयोगो हि तैर्ध्रुवम् ॥१६॥

अदर्शनादापतितः पुनश्चादर्शनं गतः ।
न त्वासौ वेद न त्वं तं कः सन्कमनुशोचसि ॥१७॥

तृष्णार्ति प्रभवं दुःखं दुःखार्ति प्रभवं सुखम् ।
सुखात्सञ्जायते दुःखमेवमेतत्पुनः पुनः ।
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ॥१८॥

सुखात्त्वं दुःखमापन्नः पुनरापत्स्यसे सुखम् ।
न नित्यं लभते दुःखं न नित्यं लभते सुखम् ॥१९॥

नालं सुखाय सुहृदो नालं दुःखाय शत्रवः ।
न च प्रज्ञालमर्थानां न सुखानामलं धनम् ॥२०॥

न बुद्धिर्धनलाभाय न जाड्यमसमृद्धये ।
लोकपर्याय वृत्तान्तं प्राज्ञो जानाति नेतरः ॥२१॥

बुद्धिमन्तं च मूढं च शूरं भीरुं जदं कविम् ।
दुर्बलं बलवन्तं च भागिनं भजते सुखम् ॥२२॥

धेनुर्वत्सस्य गोपस्य स्वामिनस्तस्करस्य च ।

पयः पिबति यस्तस्या धेनुस्तस्येति निश्चयः ॥ २३ ॥

ये च मूढतमा लोके ये च बुद्धेः परं गताः ।
ते नराः सुखमेधन्ते क्लिश्यत्यन्तरितो जनः ॥ २४ ॥

अन्त्येषु रेमिरे धीरा न ते मध्येषु रेमिरे ।
अन्त्य प्राप्तिं सुखामाहुर्दुःखमन्तरमन्तयोः ॥ २५ ॥

ये तु बुद्धिसुखं प्राप्ता द्वन्द्वातीता विमत्सराः ।
तान्नैवार्था न चानर्था व्यथयन्ति कदा चन ॥ २६ ॥

अथ ये बुद्धिमप्राप्ता व्यतिक्रान्ताश्च मूढताम् ।
तेऽतिवेलं प्रहृष्यन्ति सन्तापमुपयान्ति च ॥ २७ ॥

नित्यप्रमुदिता मूढा दिवि देवगणा इव ।
अवलेपेन महता परिदृब्धा विचेतसः ॥ २८ ॥

सुखं दुःखान्तमालस्यं दुःखं दाक्ष्यं सुखोदयम् ।
भूतिश्चैव श्रिया सार्धं दक्षे वसति नालसे ॥ २९ ॥

सुखं वा यदि वा दुःखं द्वेष्यं वा यदि वा प्रियम् ।
प्राप्तं प्राप्तमुपासीत हृदयेनापराजितः ॥ ३० ॥

शोकस्थान सहस्राणि हर्षस्थान शतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ ३१ ॥

बुद्धिमन्तं कृतप्रज्ञं शुश्रूसुमनसूयकम् ।
दान्तं जितेन्द्रियं चापि शोको न स्पृशते नरम् ॥ ३२ ॥

एतां बुद्धिं समास्थाय गुप्तचित्तश्चरेद्बुधः ।
उदयास्तमयज्ञं हि न शोकः स्प्रस्तुमर्हति ॥ ३३ ॥

यन्निमित्तं भवेच्छोकस्त्रासो वा दुःखमेव वा ।
आयासो वा यतोमूलस्तदेकाङ्गमपि त्यजेत् ॥ ३४ ॥

यद्यत्त्यजति कामानां तत्सुखस्याभिपूर्यते ।
कामानुसारी पुरुषः कामाननु विनश्यति ॥ ३५ ॥

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णा क्षयसुखस्यैते नार्हतः सोदशीं कलाम् ॥ ३६ ॥

पूर्वदेहकृतं कर्म शुभं वा यदि वाशुभम् ।
प्राज्ञं मूढं तथा शूरं भजते यादृशं कृतम् ॥ ३७ ॥

एवमेव किलैतानि प्रियाण्येवाप्रियाणि च ।
जीवेषु परिवर्तन्ते दुःखानि च सुखानि च ॥ ३८ ॥

तदेवं बुद्धिमास्थाय सुखं जीवेद्गुणान्वितः ।
सर्वान्कामाञ्जुगुप्सेत सङ्गान्कुर्वीत पृष्ठतः ।
वृत्त एष हृदि प्रौधो मृत्युरेष मनोमयः ॥ ३९ ॥

यदा संहरते कामान्कूर्मोऽङ्गानीव सर्वशः ।
तदात्मज्योतिरात्मा च आत्मन्येव प्रसीदति ॥ ४० ॥

किं चिदेव ममत्वेन यदा भवति कल्पितम् ।
तदेव परितापार्थं सर्वं सम्पद्यते तदा ॥ ४१ ॥

न बिभेति यदा चायं यदा चास्मान्न बिभ्यति ।
यदा नेच्छति न द्वेष्टि ब्रह्म सम्पद्यते तदा ॥ ४२ ॥

उभे सत्यानृते त्यक्त्वा शोकानन्दौ भयाभये ।
प्रियाप्रिये परित्यज्य प्रशान्तात्मा भविष्यसि ॥ ४३ ॥

यदा न कुरुते धीरः सर्वभूतेषु पापकम् ।
कर्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा ॥ ४४ ॥

या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।
योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम् ॥ ४५ ॥

अत्र पिङ्गलया गीता गाथाः श्रूयन्ति पार्थिव ।
यथा सा कृच्छ्रकालेऽपि लेभे धर्मं सनातनम् ॥ ४६ ॥

सङ्केते पिङ्गला वेश्या कान्तेनासीद्विनाकृता ।
अथ कृच्छ्रगता शान्तां बुद्धिमास्थापयत्तदा ॥ ४७ ॥

पिन्गला

उन्मत्ताहमनुन्मत्तं कान्तमन्ववसं चिरम् ।
अन्तिके रमणं सन्तं नैनमध्यगमं पुरा ॥ ४८ ॥

एकस्थूनं नवद्वारमपिधास्याम्यगारकम् ।
का हि कान्तमिहायान्तमयं कान्तेति मन्स्यते ॥ ४९ ॥

अकामाः कामरूपेण धूर्ता नरकरूपिणः ।
न पुनर्वञ्चयिष्यन्ति प्रतिबुद्धास्मि जागृमि ॥ ५० ॥

अनर्थोऽपि भवत्यर्थो दैवात्पूर्वकृतेन वा ।
सम्बुद्धाहं निराकारा नाहमद्याजितेन्द्रिया ॥ ५१ ॥

सुखं निराशः स्वपिति नैराश्यं परमं सुखम् ।

आशामनाशां कृत्वा हि सुखं स्वपिति पिङ्गला ॥५२॥

भी

एतैश्चान्यैश्च विप्रस्य हेतुमद्भिः प्रभाषितैः ।

पर्यवस्थापितो राजा सेनजिन्मुमुदे सुखम् ॥५३॥

॥ इति पिन्गलगीता समाप्ता ॥

---

Please send corrections to Sunder Hattangadi(sunderh@hot(ail.co();

Last updated June 22, 1998